# ॥ लघुसप्तशतीस्तोत्रम् ॥

ॐ अस्य श्रीलघुसप्तशतीस्तोत्रमन्त्रस्य भगवान् सदाशिव ऋषिः अनुष्टुप् छन्दः त्रिशक्तिरूपिणी चण्डिका देवता ऐं बीजं ह्रीं शक्तिः क्लीं कीलकं चतुर्विधपुरुषार्थ सिद्ध्यर्थे जपे विनियोगः ॥

नमो विरिञ्चेर्वरवल्लभायै
नमोऽस्तु ते शङ्करवल्लभायै ।
नमोऽस्तु नारायणवल्लभायै
श्रीचण्डिकायै शरणं प्रपद्ये ॥

ब्रह्मादयो देवि भजन्ति देवाः
वसिष्ठमुख्या ऋषयश्च सर्वे ।
सिन्दूरवर्णां तरुणार्ककान्तिं
श्रीचण्डिके त्वां सततं स्मरामि ॥

श्रीसिद्धिनाथ भवतो भुवनैकभर्तुः

भाषा परामृतमयी निगमान्तरस्था।
एषा त्वनन्यशरणस्य ममाश्रुतस्य
वृत्ता निसर्गकरुणावरुणालयस्था॥

ॐ नमश्चण्डिकायै

यत्कर्म धर्मनिलयं प्रवदन्ति तज्ज्ञा
यज्ञादिकं तदखिलं सफलं त्वयैव।
त्वं चेतना यत इति प्रविचार्य चित्ते
नित्यं त्वदीयचरणौ शरणं प्रपद्ये॥ १ ॥

पाथोऽधिनाथतनयापतिरेष शेष-
पर्यङ्कलालितवपुः पुरुषः पुराणः।
त्वन्मोहपाशविवशो जगदम्ब सोऽपि
व्याघूर्णमाननयनः शयनं चकार॥ २ ॥

तत्कौतुकं जननि यस्य जनार्दनस्य
कर्णप्रसूतमलजौ मधुकैटभाख्यौ ।
तस्यापि यौ न भवतः सुलभौ निहन्तुं
त्वन्मायया कबलितौ विलयं गतौ तौ ॥ ३ ॥

यन्माहिषं वपुरपूर्वबलोपपन्नं
यन्नाकनायकपराक्रमजित्वरं च ।
यल्लोकशोकजननव्रतबद्धहार्दं
तल्लीलयैव दलितं गिरिजे भवत्या ॥ ४ ॥

यो धूम्रलोचन इति प्रथितः पृथिव्यां
भस्मीभभूव समरे तव हुङ्कृतेन ।
सर्वासुरक्षयकृते गिरिराजकन्ये
मन्ये स्वमन्युदहने कृत एष होमः ॥ ५ ॥

केषामपि त्रिदशनायकपूर्वकाणां
जेतुं न जातु सुलभावपि चण्डमुण्डौ ।
तौ दुर्मदौ सपदि चाम्बरतुल्यमूर्ते
मातस्तवासिकुलिशात्पतितौ विशीर्षौ ॥ ६ ॥

दौत्येन ते शिव इति प्रथितप्रभावो
देवोऽपि दानवपतेः सदनं जगाम ।
भूयोऽपि तस्य चरितं प्रथयाञ्चकार
सा त्वं प्रसीद शिवदूति विजृम्भितं ते ॥ ७ ॥

चित्रं तदेतदमरैरपि ये न जेयाः
शस्त्राभिघातपतिताद्रुधिरादपर्णे ।
भूमौ बभूवुरमिताः प्रतिरक्तबीजाः
तेऽपि त्वयैव गिलिता वदने समस्ताः ॥ ८ ॥

आश्चर्यमेतदतुलं यदभूत्सुरारिः
त्रैलोक्यवैभवविलुण्ठनपुष्टपाणिः ।
शस्त्रैर्निहत्य भुवि शुम्भनिशुम्भसंज्ञौ
नीतौ त्वया जननि तावपि नाकलोकम् ॥ ९ ॥

त्वत्तेजसि प्रलकालहुताशनेऽस्मिन्
यस्मिन् प्रयान्ति विलयं भुवनानि सद्यः ।
तस्मिन् निपत्य शलभा इव दानवेन्द्रा
भस्मीभवन्ति हि भवानि किमत्र चित्रम् ॥ १० ॥

तत् किं गृणामि भवतीं भवतीव्रताप-
निर्वापणप्रणयिनीं प्रणमज्जनेषु ।
तत् किं गृणामि भवतीं भवतीव्रताप-
संवर्धनप्रणयिनीं विमतस्थितेषु ॥ ११ ॥

वामे करे तदितरे च यथोपरिष्टात्
पात्रं सुधारसभृतं वरमातुलुङ्गम् ।
खेटं गदां च दधतीं भवतीं भवानीं
ध्यायन्ति येऽरुणनिभां कृतिनस्त एव ॥ १२ ॥

यद्वारुणात्परमिदं जगदम्ब यत्ते
बीजं स्मरेदनिदिनं दहनाधिरूढम् ।
मायाङ्कितं तिलकितं तरुणेन्दुबिन्दु-
नादैरमन्दमिह राजमसौ भुनक्ति ॥ १३ ॥

अन्तः स्थिताप्यखिलजन्तुषु तन्तुरूपा
विद्योतसे बहिरिहाखिलविश्वरूपा ।
का भूरि शब्दरचना वचनातिगासी-
द्दीनं जनं जननि मामव निष्प्रपञ्चम् ॥ १४ ॥

आवाहनं यजनवर्णनमग्निहोत्रं
कर्मार्पणं त्वयि विसर्जनमत्र देवि।
मोहान्मया कृतमिदं सकलापराधं
मातः क्षमस्व वरदे बहिरन्तरस्थे॥ १५॥

एतत्पठेदनुदिनं दनुजान्तकारि
चण्डीचरित्रमतुलं भुवि यस्त्रिकालम्।
श्रीमान् सुखी स विजयी सुभगः क्षमः स्यात्
त्यागी चिरन्तनवपुः कविचक्रवर्ती॥ १६॥

श्रीसिद्धनाथापरनामधेयः
श्रीशम्भुनाथो भुवनैकनाथः।
तस्य प्रसादात् सुलभागमश्रीः
पृथ्वीधरः स्तोत्रमिदं चकार॥ १७॥

प्रथमा विष्णुमाया च द्वितीया चेतना तथा।
बुद्धिर्निद्रा क्षुधा छाया शक्तिस्तृष्णास्तथाष्टमी॥ १८॥
क्षान्तिर्जातिस्तथा लज्जा शान्तिः श्रद्धा च कान्तिका।
लक्ष्मीर्वृत्तिः स्मृतिश्चैव दया दीप्तिस्तथैव च॥ १९॥
तुष्टिः पुष्टिस्तथा माता भ्रान्तिः सर्वात्मिका तथा।
त्रयोविंशतिसंख्याता या देवी गणिता शुभा।
भुक्तिर्मुक्तिर्नदूरस्था शुद्धपाठवतां नृणाम्॥ २०॥

देव्याः स्तवं ज्ञानमयं कृतं यत्
पृथ्वीधराचार्यवरेण सम्यक्।
यच्चोद्धृतं सप्तशतीस्थसारं
सर्वान्वितं तन्निगमस्य सारम्॥ २१॥

॥ इति शिवम्॥

**|| laghusaptaśatīstotram ||**

OM asya śrīlaghusaptaśatīstotramantrasya bhagavān sadāśiva ṛṣiḥ anuṣṭup chandaḥ triśaktirūpiṇī caṇḍikā devatā aiṃ bījaṃ hrīṃ śaktiḥ klīṃ kīlakaṃ caturvidhapuruṣārtha siddhyarthe jape viniyogaḥ ||

namo virincervaravallabhāyai
namo.astu te śaṅkaravallabhāyai |
namo.astu nārāyaṇavallabhāyai
śrīcaṇḍikāyai śaraṇaṃ prapadye ||

brahmādayo devi bhajanti devāḥ
vasiṣṭhamukhyā ṛṣayaśca sarve |
sindūravarṇāṃ taruṇārkakāntiṃ
śrīcaṇḍike tvāṃ satataṃ smarāmi ||

śrīsiddhinātha bhavato bhuvanaikabhartuḥ
bhāṣā parāmṛtamayī nigamāntarasthā |
eṣā tvananyaśaraṇasya mamāśrutasya
vṛttā nisargakaruṇāvaruṇālayasthā ||

OM namaścaṇḍikāyai

yatkarma dharmanilayaṃ pravadanti tajjnā
yajnādikaṃ tadakhilaṃ saphalaṃ tvayaiva |
tvaṃ cetanā yata iti pravicārya citte
nityaṃ tvadīyacaraṇau śaraṇaṃ prapadye || 1 ||

pātho.adhināthatanayāpatireṣa śeṣa-
paryaṅkalālitavapuḥ puruṣaḥ purāṇaḥ |
tvanmohapāśavivaśo jagadamba so.api
vyāghūrṇamānanayanaḥ śayanaṃ cakāra || 2 ||

tatkautukaṃ janani yasya janārdanasya
karṇaprasūtamalajau madhukaiṭabhākhyau |
tasyāpi yau na bhavataḥ sulabhau nihantuṃ
tvanmāyayā kabalitau vilayaṃ gatau tau || 3 ||

yanmāhiṣaṃ vapurapūrvabalopapannaṃ
yannākanāyakaparākramajitvaraṃ ca |

yallokaśokajananavratabaddhahārdaṃ
tallīlayaiva dalitaṃ girije bhavatyā || 4 ||

yo dhūmralocana iti prathitaḥ pṛthivyāṃ
bhasmībhabhūva samare tava huṅkṛtena |
sarvāsurakṣayakṛte girirājakanye
manye svamanyudahane kṛta eṣa homaḥ || 5 ||

keṣāmapi tridaśanāyakapūrvakāṇāṃ
jetuṃ na jātu sulabhāvapi caṇḍamuṇḍau |
tau durmadau sapadi cāmbaratulyamūrte
mātastavāsikuliśātpatitau viśīrṣau || 6 ||

dautyena te śiva iti prathitaprabhāvo
devo.api dānavapateḥ sadanaṃ jagāma |
bhūyo.api tasya caritaṃ prathayāncakāra
sā tvaṃ prasīda śivadūti vijṛmbhitaṃ te || 7 ||

citraṃ tadetadamarairapi ye na jeyāḥ
śastrābhighātapatitādrudhirādaparṇe |

bhūmau babhūvuramitāḥ pratiraktabījāḥ
te.api tvayaiva gilitā vadane samastāḥ || 8 ||

āścaryametadatulaṃ yadabhūtsurāriḥ
trailokyavaibhavaviluṇṭhanapuṣṭapāṇiḥ |
śastrairnihatya bhuvi śumbhaniśumbhasaṃjnau
nītau tvayā janani tāvapi nākalokam || 9 ||

tvattejasi pralakālahutāśane.asmin
yasmin prayānti vilayaṃ bhuvanāni sadyaḥ |
tasmin nipatya śalabhā iva dānavendrā
bhasmībhavanti hi bhavāni kimatra citram || 10 ||

tat kiṃ gr̥ṇāmi bhavatīṃ bhavatīvratāpa-
nirvāpaṇapraṇayinīṃ praṇamajjaneṣu |
tat kiṃ gr̥ṇāmi bhavatīṃ bhavatīvratāpa-
saṃvardhanapraṇayinīṃ vimatasthiteṣu || 11 ||

vāme kare taditare ca yathopariṣṭāt
pātraṃ sudhārasabhr̥taṃ varamātuluṅgam |

kheṭaṃ gadāṃ ca dadhatīṃ bhavatīṃ bhavānīṃ
dhyāyanti ye.aruṇanibhāṃ kṛtinasta eva || 12 ||

yadvāruṇātparamidaṃ jagadamba yatte
bījaṃ smaredanidinaṃ dahanādhirūḍham |
māyāṅkitaṃ tilakitaṃ taruṇendubindu-
nādairamandamiha rājamasau bhunakti || 13 ||

antaḥ sthitāpyakhilajantuṣu tanturūpā
vidyotase bahirihākhilaviśvarūpā |
kā bhūri śabdaracanā vacanātigāsī-
ddīnaṃ janaṃ janani māmava niṣprapancam || 14 ||

āvāhanaṃ yajanavarṇanamagnihotraṃ
karmārpaṇaṃ tvayi visarjanamatra devi |
mohānmayā kṛtamidaṃ sakalāparādhaṃ
mātaḥ kṣamasva varade bahirantarasthe || 15 ||

etatpaṭhedanudinaṃ danujāntakāri
caṇḍīcaritramatulaṃ bhuvi yastrikālam |

śrīmān sukhī sa vijayī subhagaḥ kṣamaḥ syāt
tyāgī cirantanavapuḥ kavicakravartī || 16 ||

śrīsiddhanāthāparanāmadheyaḥ
śrīśambhunātho bhuvanaikanāthaḥ |
tasya prasādāt sulabhāgamaśrīḥ
pṛthvīdharaḥ stotramidaṃ cakāra || 17 ||

prathamā viṣṇumāyā ca dvitīyā cetanā tathā |
buddhirnidrā kṣudhā chāyā śaktistṛṣṇāstathāṣṭamī || 18 ||
kṣāntirjātistathā lajjā śāntiḥ śraddhā ca kāntikā |
lakṣmīrvṛttiḥ smṛtiścaiva dayā dīptistathaiva ca || 19 ||
tuṣṭiḥ puṣṭistathā mātā bhrāntiḥ sarvātmikā tathā |
trayoviṃśatisaṃkhyātā yā devī gaṇitā śubhā |
bhuktirmuktirnadūrasthā śuddhapāṭhavatāṃ nṛṇām || 20 ||

devyāḥ stavaṃ jnānamayaṃ kṛtaṃ yat
pṛthvīdharācāryavareṇa samyak |
yaccoddhṛtaṃ saptaśatīsthasāraṃ
sarvānvitaṃ tannigamasya sāram || 21 ||

|| iti śivam ||

www.kamakotimandali.com